# Annapurna Stotram

Sanskrit · Devanagari source script · Latin rendering available

॥ अन्नपूर्णास्तोत्रम् ॥

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी
प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥१॥

|| annapūrṇāstotram ||

nityānandakarī varābhayakarī saundaryaratnākarī
nirdhūtākhilaghorapāvanakarī pratyakṣamāheśvarī |
prāleyācalavaṃśapāvanakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||1||

नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागुरूवासिता रुचिकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥२॥

nānāratnavicitrabhūṣaṇakarī hemāmbarāḍambarī
muktāhāravilambamānavilasadvakṣojakumbhāntarī |
kāśmīrāgurūvāsitā rucikarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||2||

योगानन्दकरी रिपुक्षयकरी धर्माथनिष्ठाकरी चन्द्रार्कानलभासमानलहरी
त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यसमस्तवांछनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥३॥

yogānandakarī ripukṣayakarī dharmāthaniṣṭhākarī
candrārkānalabhāsamānalaharī trailokyarakṣākarī |
sarvaiśvaryasamastavāṃchanakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||3||

कैलासाचलकन्दरालयकरी गौरी उमाशङ्करी कौमारी निगमार्थगोचरकरी
ॐकारबीजाक्षरी ।
मोक्षव्दारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥४॥

kailāsācalakandarālayakarī gaurī umāśaṅkarī kaumārī
nigamārthagocarakarī oṃkārabījākṣarī |
mokṣavdārakapāṭapāṭanakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||4||

दृश्यादृश्यविभूतवाहनकरी ब्रम्हाण्डभाण्डोदरी लीलानाटकसूत्रभेदनकरी
विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥५॥

dṛśyādṛśyavibhūtavāhanakarī bramhāṇḍabhāṇḍodarī
līlānāṭakasūtrabhedanakarī vijñānadīpāṅkurī |
śrīviśveśamanaḥprasādanakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||5||

उर्वी सर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी वेणीनीलसमानकुन्तलहरी
नित्यान्नदानेश्वरी ।
सर्वानन्दकरी सदाशुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥६॥

urvī sarvajaneśvarī bhagavatī mātānnapūrṇeśvarī
veṇīnīlasamānakuntalaharī nityānnadāneśvarī |
sarvānandakarī sadāśubhakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||6||

आदिक्षान्तिसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी काश्मीरात्रिपुरेश्वरी
त्रिनयनी नित्याङ्कुरा शर्वरी ।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥७॥

ādikṣāntisamastavarṇanakarī śambhostribhāvākarī kāśmīrātripureśvarī
trinayanī nityāṅkurā śarvarī |
kāmākāṅkṣakarī janodayakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||7||

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वामा स्वादुपयोगधरप्रियकरी
सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी दशाशुभहरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥८॥

devī sarvavicitraratnaracitā dākṣāyaṇī sundarī vāmā
svādupayogadharapriyakarī saubhāgyamāheśvarī |
bhaktābhīṣṭakarī daśāśubhaharī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||8||

चन्द्रार्कालयकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी चन्द्रार्काग्निसमानकुंडलधरी
चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥९॥

candrārkālayakoṭikoṭisadṛśā candrāṃśubimbādharī
candrārkāgnisamānakuṃḍaladharī candrārkavarṇeśvarī |
mālāpustakapāśasāṃkuśadharī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||9||

क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदा
शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी
मातान्नपूर्णेश्वरी ॥१०॥

kṣatratrāṇakarī mahā'bhayakarī mātā kṛpāsāgarī sākṣānmokṣakarī sadā
śivakarī viśveśvarī śrīdharī |
dakṣākrandakarī nirāmayakarī kāśīpurādhīśvarī bhikṣāṃ dehi
kṛpāvalambanakarī mātānnapūrṇeśvarī ||10||

भगवति भवरोगात्पीडितं दुष्कृतोत्थात् सुतदुहितृकलत्रोपद्रवेणानुयातम् ।
विलसदमृतदृष्ट्या वीक्ष्य विभ्रान्तचित्तं सकलभुवनमातस्त्राहि मामों नमस्ते ॥
११॥

bhagavati bhavarogātpīḍitaṃ duṣkṛtotthāt
sutaduhitṛkalatropadraveṇānuyātam |
vilasadamṛtadṛṣṭyā vīkṣya vibhrāntacittaṃ sakalabhuvanamātastrāhi
māmoṃ namaste ||11||

माहेश्वरीमाश्रितकल्पवल्लीमहम्भवोच्छेदकरीं भवानीम् ।
क्षुधार्तजायातनयाद्युपेतस्त्वामन्नपूर्णे शरणं प्रपद्ये ॥१२॥

māheśvarīmāśritakalpavallīmahambhavocchedakarīṃ bhavānīṃm |
kṣudhārtajāyātanayādyupetastvāmannapūrṇe śaraṇaṃ prapadye ||12||

दारिद्र्यदावानलदह्यमानं पाह्यन्नपूर्णे गिरिराजकन्ये ।
कृपाम्बुधौ मज्जय मां त्वदीये त्वत्पादपद्मार्पितचित्तवृत्तिम् ॥१३॥

dāridryadāvānaladahyamānaṃ pāhyannapūrṇe girirājakanye |
kṛpāmbudhau majjaya māṃ tvadīye tvatpādapadmārpitacittavṛttim ||13||

अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥१४॥

annapūrṇe sadā pūrṇe śaṅkaraprāṇavallabhe |
jñānavairāgyasiddhyarthaṃ bhikṣāṃ dehi ca pārvati ||14||

माता च पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वेदेशो भुवनत्रयम् ॥१५॥

mātā ca pārvatī devī pitā devo maheśvaraḥ |
bāndhavāḥ śivabhaktāśca svedeśo bhuvanatrayam ||15||

इति श्रीमच्छंकराचार्यविरचितमन्नपूर्णास्तोत्रं संपूर्णम् ।

iti śrīmacchaṃkarācāryaviracitamannapūrṇāstotraṃ saṃpūrṇam |

---

## Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. अन्नपूर्णास्तोत्रम्, revision 180872. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-180872-d53d56f15d.